MaiS. iv.1.12 (iv.15.7); बर्द्धेन जुहोति दक्षिणानां वां एषोऽन्वारम्भौ द्यां गच्छ MaiS. iv.8.2 (iv.108.10); **2A** name of an initiatory rite or sacrifice अथातोऽन्वारम्भस्यैव मीमांसान्वारम्भं पौर्णमास्याः समानोपवसथं करोति BaudhŚS. i.67.18; उक्तोऽन्वारम्भोऽथ वै भवत्युषयो वा इन्द्रं प्रत्यक्षं नापश्यन्तं वसिष्ठः प्रत्यक्षमपश्यत् BaudhŚS. ii. 187.3; **2B** initiatory formula (having the word *anvārambha*) अथैनं यज्ञस्यान्वारम्भं वाचयति BaudhŚS. i.161.11; iii.85.15; **2C** act of referring again योगफलमुपसंहृत्य पुनरन्वारम्भेण योगस्य कर्तव्यता उच्यते GītāBh. (Śaṅ.) 198.2 (*on* 6.23); **3** act of touching ईषाया अन्वारम्भ इति सूत्रं बौधायनस्यानन्वारभ्यैवेषां प्रत्यङ् द्रवन्मन्त्रं जपेत् BaudhŚS. ii.91.5; अहरहर्योगविमोकान्वारंभान्वारोहापुसुमत्यावहसंतानाश्च वसतीवरीरिध्माबर्हिः पयसां दोहनम् MānŚS. 166.7; प्रतिपश्वध्वर्यवोऽन्वारम्भेण वपोद्धरणे वपाश्रपणे च सकृदादित्योपस्थानम् VārāŚS. III. ii.6.45; अविभवति गृहपत्यन्वारम्भः KātyŚS. xii.1.12; आज्येन पश्चाहुतीर्जुहोति। आसु च न ब्रह्मणोऽन्वारम्भः VīraMi. (Saṁskāra.) 946.24; 976.6; परस्परमन्वारम्भः श्रुतः अध्वर्युं प्रस्तोता संतनुयात् MayūMāli. 502.4 (*on* vi.5.17); **4** following up to the completion अशक्तश्चेत्स्वयमारम्भमात्रं कृत्वा अन्वारम्भं बान्धवैः स्वजनैः कारयेत् CaturCin. iii(2).1162.8; देवलः। ... आरभेत् नवैः पात्रैरन्वारम्भं च बान्धवैः VīraMi. (Śrāddha.) 182.30;183.1.

**अन्वारम्भकर्तृत्व** (anvārambha-kartṛtva) *n.* agency for touching from behind वस्तुतस्तु पत्नीकर्तृकेऽवघातेऽन्वारम्भकर्तृत्वमात्रेणाध्वर्योः कर्तृत्वायोगात् MīmāKau. ii.237.9 (*on* iii.2.6)

**अन्वारम्भण** (anv-ārambhaṇa) *n.* **1A** act of touching from behind दानवाचनान्वारम्भणवरवरणव्रतप्रमाणेषु यजमानं प्रतीयात् KātyŚS. i.10.12; व्याख्यातः शुक्रस्यान्वारम्भणम् HirŚS. x.4.32 (1079.22); अथात्यन्तप्रदेशो धून्वनेऽन्वारम्भणे ... सर्वत्र कनिष्ठप्रथमा अनुपूर्वा HirPiMe. i.1.4; विहितस्यान्वारम्भणस्य विच्छेदे प्रायश्चित्तमुच्यते ŚrutaPra. iA.86.14 (*on* i.1.1); (समन्वारम्भणात्) अन्वारम्भणम् - स्पर्शः तेन संबन्धो विवक्षितः ŚrutaPra. ii.539.13 (*on* iii.4.5); द्वितीयाघारान्वारम्भणहविरभिमर्शनेडान्वारम्भणादिरूपेत्यर्थः MayūMāli. 84.10 (i.4.13); **1B** connecting link अन्वात्मीयैः कृतं कर्म न लिम्पति। अन्वारम्भणमानादावौदुम्बर्यादिवर्तिनि। स्वरूपासंभवाद्यष्टुः शरीरेणैव कर्तृता ŚlokaVār. 5(17). 90 (711.5); **2** co-existence, cf. **अन्वारम्भणप्रतीति**.

**अन्वारम्भणप्रतीति** (anvārambhaṇa-pratīti) *f.* knowledge of co-existence 'तं विद्याकर्मणी समन्वारभेते' इत्येकस्मिन्नेव पुरुषे द्वयोरन्वारम्भणप्रतीतेः ... विभागस्य दर्शनीयत्वात् ŚrutaPra. ii. 546. 22 (*on* iii.4.20)

**अन्वारम्भणीय** (anv-ārambhaṇīya) *n.* initiatory rite सौत्रामणिसोमेषु बहुशो विच्छिन्नेष्वेतेषु तदेवान्वारम्भणीयं च कृत्वाग्नीन्संदधीत VaikhāŚS. xx.31.4.

**अन्वारम्भणीयतस्** (anvārambhaṇīya-tas) *adv.* as compared to initiatory rite भार्यानाशे नाशेन पुनः संस्कारे बाधकाभावात्। वाचनिकः क्रमः इति भ्रमः। वचनस्यान्वारम्भणीयतः पूर्वं भार्याविनाशेऽप्युक्तक्रमेणोपपत्तेः BālamBha. i.242.7 (*on* 1.89)

**अन्वारम्भणीयता** (anvārambhaṇīya-tā) *f.* the state of being eligible for the initiatory rite यजमानस्यान्वारम्भणीयता संस्कृतत्वान्न तया पुनः संस्कारतः संभवति BālamBha. i.242.5 (*on* 1.89)

**अन्वारम्भणीयदेवता** (anvārambhaṇīya-devatā) *f.* deity of initiatory rite पूर्वं तु दर्शपूर्णमासाभ्यामन्वारम्भणीयदेवताभ्यो जुहुयात् ŚāṅkhāGS. i.3.6; VīraMi. (Saṁskāra.) 898.8.

**अन्वारम्भणीया** (anv-ārambhaṇīyā) *f.* initiatory rite or sacrifice (to be performed at the beginning of Darśapūrṇamāsa sacrifices) दर्शपूर्णमासावारभ्यमानोऽन्वारम्भणीयाम् ĀśvaŚS.I.ii.8.1; पूर्वा दर्शपूर्णमासाभ्यामन्वारम्भणीयेष्टिः ŚāṅkhāŚS.ii.4.1; बहुषु व्यतीतेष्वन्वारम्भणीया स्यादिति BaudhŚS. iii.331.7; अन्वारम्भणीयामिष्टिं निर्वपति BhārŚS. v. 15.9; सैषान्वारम्भणीयायाः स्थानं प्रत्येति BhārŚS. viii.1.5; ĀpaŚS.v.23.4; viii.1.3; HirŚS. iii.5.21 (326.4); iv.1.4 (394.15); v.1.2 (448.3); VaikhāŚS. 1.17; अन्वारम्भणीया विकृतौ न स्यात् ĀpaŚS. xxiv.4.19; अन्वारम्भणीयायाः सप्ताज्याहुतीर्जुहोति VārāŚS. I.iv.4.40-41; अन्वारम्भणीयाग्नावैष्णव एकादशकपालः सरस्वत्यै चरुः सरस्वते द्वादशकपालो दर्शपूर्णमासारम्भे KātyŚS. iv.5.22; मिथुनौ गावावन्वारम्भणीयायां ददाति HirŚS. vi.5.39 (534.3); iii.5.29 (327.6); अमावास्यायां भविष्यन्त्यामादधानस्य नान्वारम्भणीयाग्नेयमेवाष्टाकपालं निर्वपेत् VaikhāŚS. 1.17; मिथुनौ दक्षिणान्वारम्भणीयायामिष्टौ LātyāŚS. iv.12.14; DrāhyŚS. xii.4.19; संवत्सरादूर्ध्वं परीणं नाम स्थली कुरुक्षेत्रे तस्यामग्नीनाधाय यथाकालमन्वारम्भणीयेष्ट्या प्रसृज्येत LātyāŚS. x.19.1; निर्वपेदित्युद्यारितेऽप्यन्वारम्भणीया क्रत्वर्था भवत्येव TupṬ. 196.3 (*on* ix. 1.35); अन्वारम्भणीया दर्शपूर्णमासारम्भे चोदिता ManuBh. i.113.7 (*on* 2.71); अन्वारम्भणीया विकृतिष्वपि स्यात् NyāyMāVi.9.5 (*on* i.1.0); प्रयोजनं पवमानेष्टिषु पूर्वपक्षे अन्वारम्भणीया BhāṭṭDī. ii.24.7 (*on* iii.6.4); अन्वारम्भणीया वैमृधन्यायेनैव नातिदेशः BhāṭṭDī. ii.25.17 (*on* iii.6.6) याज्ञिकानाम् ... अन्वाधानमेव तत्त्वेनारम्भपदार्थः। तदर्था चान्वारम्भणीया तत्कार्यप्रयुक्ता BhāṭṭDī. iii.67.18 (*on* ix.1.11); अन्वारम्भणी-यायां तु साहित्यादेरविवक्षा BhāṭṭDī. iii.135.8 (*on* ix.2.17); अन्वारम्भणीया किं ज्योतिष्टोमाद्यङ्गभूतदीक्षणीयादिषु .... कर्तव्या BhāṭṭDī. iii.193.17 (*on* x.1.2); दर्शपूर्णमासावारप्स्यमाण इति विहिताया अन्वारम्भणीयायाः पुरुषसंस्कारद्वारा आरम्भार्थत्वम् MayūMāli. 435.10 (*on* v.3.11); 649.34 (*on* x.1.2)

**अन्वारम्भणीयाकरण** (anvārambhaṇīyā-karaṇa) *n.* performance of initiatory rite एवंविधावान्तरसङ्कल्पात्पूर्वमन्वारम्भणीयाकरणापत्तिः BhāṭṭDī. iii.70.24 (*on* ix.1.11)

**अन्वारम्भणीयाजन्य** (anvārambhaṇīyā-janya) *adj.* to be produced from initiatory rite or ceremony अन्वारम्भणीयाजन्यस्योपकारस्य यावज्जीवसत्त्वे विकृतिष्वपि प्रसङ्गात् BhāṭṭDī. iii.72.1 (*on* ix.1.11); अन्वारम्भणीयाजन्यः संस्कारः कर्त्रोरन्यतरस्य यावज्जीवमस्ति BālamBha. i.242.18 (*on* 1.89)

**अन्वारम्भणीयात्व** (anvārambhaṇīyā-tva) *n.* the state of being initiatory rite 'अन्वारम्भणीयेष्ट्या यक्ष्ये' इति संकल्पस्य ... अन्वारम्भणीयात्वावच्छिन्नोद्देश्यताकप्रवृत्तिविषयत्वाभावात् BhāṭṭDī. iii.196.20 (*on* x.1.4)

**अन्वारम्भणीयादि** (anvārambhaṇīyādi) *adj.* initiatory rite etc. न ह्यन्वारम्भणीयादिसंस्कारवानन्वारम्भणीयादौ शास्त्रेण प्रयुज्यते Āparā. 115.5 (*on* 1.89)

**अन्वारम्भणीयादिक** (anvārambhaṇīyādi-ka) *adj.* initiatory rite etc. न च संस्कारार्थमन्वारम्भणीयादिकं स्वातन्त्रेण शक्नोति भार्या कर्तुम् Āparā. 115.5 (*on* 1.89)

**अन्वारम्भणीयानुष्ठान** (anvārambhaṇīyānuṣṭhāna) *n.* performance of initiatory rite अपूर्वाधाने पत्न्यनुरोधेन सांनाय्यानुष्ठानान्वारम्भणीयानुष्ठानयोः प्राप्तौ केचित्पुंस इत्यादिवचनं स्पष्टमपूर्वाधानमेव गमयति BālamBha. i.243.13 (*on* 1.89)

**अन्वारम्भणीयान्त** (anvārambhaṇīyānta) *adj.* ending with initiatory rite of Darśapūrṇamāsa कुरुक्षेत्रे परिणहिस्थलेऽग्न्याधेयमन्वारम्भणीयान्तं भवति KātyŚS. xxiv.6.34.

**अन्वारम्भणीयापत्ति** (anvārambhaṇīyāpatti) *f.* undesired contingency of (performing) initiatory rite 'साङ्गेन ... यक्ष्ये' इत्येवंविधसंकल्पविषयकप्रवृत्तेः ... ततः पूर्वमन्वारम्भणीयापत्तिः BhāṭṭDī. iii.70.21 (*on* ix. 1.11); अग्निहोत्रीयप्रथमप्रयोगीयाद्यपदार्थस्यापि ... अन्वारम्भणीयापत्तेः BhāṭṭDī. iii.196.12 (*on* x. 1.3)

**अन्वारम्भणीयापूर्वम्** (anvārambhaṇīyāpūrvam) *adv.* prior to initiatory rite एकभार्यस्याप्याहिताग्नेरन्वारम्भणीयापूर्वं भार्यामरणे "भार्यायै पूर्वमारिण्यै" इत्यादिमनुवचनम् BālamBha. i.241.23 (*on* 1.89)

**अन्वारम्भणीयाभाव** (anvārambhaṇīyābhāva) *m.* absence of initiatory rite राजसूयगतेष्टिपशुबन्धादौ च अन्वारम्भणीयाभावस्य दशमे वक्ष्यमाणत्वात् BhāṭṭDī. iii.71.10 (ix. 1.11)

**अन्वारम्भणीयावत्** (anvārambhaṇīyā-vat) *adv.* like an initiatory rite अन्वारम्भणीयावत् सकृदेव करणं स्यात् BālaKrī. ii.83.13 (*on* 3.212 (?222)); ललिताक्रमारम्भात्पूर्वमेव ... महागणपतेरुपास्तिरन्वारम्भणीयावत् सकृदेव कार्या SetuBa. 10.29.

**अन्वारम्भणीयावाक्यशेष** (anvārambhaṇīyā-vākyaśeṣa) *m.* elliptical sentence prescribing initiatory rite अन्वारम्भणीयावाक्यशेषे अमावास्यादर्शशब्दौ समानाधिकरणौ दर्शयिष्यति TantrVār. 470.12 (*on* ii.2.3); न च दर्शशब्दस्याप्रसिद्धार्थत्वमन्वारम्भणीयावाक्यशेषेऽमावास्यापर्यायत्वेन प्रसिद्धत्वात् ŚastrDī. 403.1 (*on* iv. 4.11); अन्वारम्भणीयावाक्यशेषे च ... दर्शामावास्याशब्दयोः पर्यायत्वावगमात् प्रसिद्धार्थकत्वमाशङ्क्येत MīmāKau. iii (2).155.13 (*on* ii.2.3)

**अन्वारम्भणीयाविधि** (anvārambhaṇīyā-vidhi) *m.* injunction of initiatory rite अन्वारम्भणीयाविधिवाक्यशेषे 'दर्शो वा ...' इत्युपक्रम्य 'अमावास्या वै ...' इत्युपसंहारात् TantrRa. 224.7 (*on* iv.4.29)

**अन्वारम्भणीयाविरोध** (anvārambhaṇīyā-virodha) *m.* contradiction to the initiatory rite अन्वारम्भणीयाविरोधादिति कपर्दिना हेतुनिर्देशात् BālamBha. i.241.22 (*on* 1.89)

**अन्वारम्भणीयेष्टि** (anvārambhaṇīyeṣṭi) *f.* initiatory rite or sacrifice 'अन्वारम्भणीयेष्ट्या यक्ष्ये' इति संकल्पस्य ... अत्वारम्भणीयात्वावच्छिन्नोद्देश्यताकप्रवृत्तिविषयत्वाभावात् BhāṭṭDī.iii.196.20 (*on* x.1.4); अन्तेवासिभिर्योगमिच्छन्निति लिङ्गाच्च प्रथमाध्ययने चैतत् अन्वारम्भणीयेष्टिवत् VīraMi. (Saṁskāra.) 502.21.

**अन्वारम्भणीयोत्तरम्** (anvārambhaṇīyottaram) *adv.* after initiatory rite अन्वारम्भणीयोत्तरं मृताया अन्वारम्भणीयाविरोधान्न श्रौताग्निभिर्दाहः BālamBha. i.241.23 (*on* 1.89)